THE INSTITUTE FOR ADVANCED STUDIES OF WORLD RELIGIONS

FILM—STRIP NO.
MBB—1971—56-23

BUDDHIST SANSKRIT MANUSCRIPTS

IASWR

MICROFILM PROJECT NEB 11

MBB - 1972 - 56
1. Film strip number

15
2. Source

SĀMĀNYALAKṢAṆAVIVEKA
3. Title

4. Additional title, shortened forms of title etc.

N. S. + 880 = A.D.
5. Year in which MS was copied (Nepali Samvat and Christian Era)

6. Name of scribe

NEPALI PAPER
7. Material (palm leaf, etc.)

DEVANĀGARĪ
8. Script

30 cm x 10 cm
9. Size

11
10. Lines to a page

9
11. Number of leaves in complete work

x
12. Missing leaves

x
13. Author and Date of composition (if given)

x
14. Number od Chapters

The text on Logic
15. Remarks

NOV. 3 1972
Date photographed

श्रीमद्गणपतयेनमः॥ सामान्यधर्मज्ञानानन्तरं यावत्सामान्याश्रयप्रत्यक्षोदयात्सामान्यलक्षणाप्रत्यासत्तेः प्रत्यक्षहेतुत्वमभ्युपेयते॥ सा
ज्ञायमानंसामान्यज्ञानंवा।ज्ञानञ्चतद्द्विधजन्यं ग्राह्यं॥स्मरणभिन्नेन्द्रियजन्यज्ञानानन्तरं यावत्सामान्याश्रयप्रत्यक्षानुदयात्तावच्च घटत्वादि
प्रकारतानिरूपिता लौकिकमुख्यविशेष्यताशालिचक्षुर्यत्वावच्छिन्नप्रतियोगिकचक्षुर्जन्यघटत्वप्रकारकचाक्षुषज्ञानादिनावाहित
त्वात्॥द्रव्यत्वादिसामान्यलक्षणाजन्यज्ञानेव्यभिचारवारणाय घटत्वादिप्रकारतानिरूपितत्वं मुख्यविशेष्यतायां विशिष्टं ज्ञानंशेयघटत्व
प्रकारकत्वनिवेशेघटत्वनिर्विकल्पकात्पूर्वोत्पन्नेसन्निकृष्टघटांशेघटत्वप्रकारकयावद्द्रव्यप्रत्यक्षेद्रव्यत्वसामान्यलक्षणाजन्येव्यभिचारस्त्व
तन्तुर्येक्षितेति॥ नचघटत्वरूपविशेषणविशेष्यनासकसामग्रीसत्वेसन्निकृष्टघटांशेयिघटत्वनानेवाबकानावातादृशेघटज्ञानस्यघटत्वप्र
कारतानिरूपितलौकिकान्यमुख्यविशेष्यताशालित्वेनयथोक्तधर्मस्यकार्यतावच्छेदकत्वेपितत्र व्यभिचारोद्धारश्चतिवाच्यं॥घटत्वसामान्य
लक्षणाकृत्यकारणाविरहेणैवतत्रासन्निकृष्टघटेघटत्वनानासंभवात्। नचघटत्वसामान्यलक्षणाविनायितत्रघटेघटत्वप्रकारकबुद्धेर्विशेष
णज्ञानेनजननात्॥तद्बलोद्भूतांशेघटत्वप्रकारकज्ञानायतौसामान्यलक्षणाविरहोकिञ्चित्कर एवेतिवाच्यं॥घटत्वसामान्यलक्षणाघटज्ञाना
त्मकज्ञानप्रत्यासत्तितद्भूतलौकिकसन्निकर्षान्यतमवशेषसामग्रीसहकृतविशेषणज्ञानादीनामेवतत्तद्भूतांशेघटत्वप्रकारकप्रत्यक्षज
नकत्वात्॥यथोक्तस्थलेचतादृशविशेषसामग्रीविरहेणयादृनानसंभवात्॥जातित्वादिनाविशेष्यकस्मरणानन्तरं द्रव्यत्वप्रकारकघट

विशेष्यक वास्तुसंयुक्तसंयोगत्वावच्छिन्नप्रत्यक्षे [illegible] कारतायाज्ञानमेव नेत्यतश्चिन्नकाचिदनुपपत्तिः॥ लौकिकान्यविशेष्यतायान्निवे
शान्निर्विकल्पक कोत्तरोत्पन्नलौकिकप्रत्यक्षेनव्याप्तिवारणाय॥ नवसामान्यलक्षणाजन्यज्ञानत्वं यावद्घटविशेष्यकत्वनिर्वाहाय यावद्घटविशेष्यक
त्वस्यावश्यकार्यतावच्छेदककोटौनिवेशेनलौकिकसन्निकर्षजन्यप्रत्यक्षस्य यावद्घटाविशेष्यकत्वेनैवतत्रव्याप्तिवारणसंभवतीतिकिं लौकिकान्य
त्वनिवेशेनेतिवाच्यं॥ यावद्घटविशेष्यकत्वस्यानिवेशेयिवाप्रकविरहेणयावद्घटज्ञानोपयतौतन्निवेशेप्ययोजनविरहात्॥ व्याप्तिवारवारणाया
दिपक्षयालाघवेनलौकिकान्यत्वस्यनिवेशयितुमुचितत्वात्॥ तत्तद्घटादिरूपसामान्यलक्षणास्थलेयावत्[illegible]द्विषयत्वनिवेशेयिव्याप्ति
वारवारणसंभवाच्च॥ मुख्यत्वनिवेशाद्घटत्वादिप्रकारकस्मरणाद्विजन्योयनीतज्ञानादौनव्याप्तिवारः॥ नहिलैंङ्गियजन्योयनीतज्ञानेचोपनीतस्य
विशेषणतयैवज्ञानात्॥ मुख्यत्वंचप्रकारतान्यत्वं॥ घटत्वादिविषयकनिर्विकल्पोदयेयावद्घटप्रत्यक्षानुदयात्कारणत्वावच्छेदककोटौप्रका
रतानिवेशः॥ एकसंबंधेनसामान्यप्रकारकज्ञानात्संबंधांतरेणसामान्याश्रयप्रत्यक्षापत्तिवारणायतत्संबंधेनसामान्याश्रयप्रत्यक्षहेतुता
यांतत्संबंधावच्छिन्नप्रकारतेवनिवेशिता॥ अथचसामान्यनेदेनसंबंधेनचकारणत्वनेदोवाच्यः॥ तत्रप्रथमकल्पेकारणतावच्छेदकप्रत्यासत्तिसमवा
यः॥ कार्यतावच्छेदकप्रत्यासत्तिश्चविषयता॥ नवविषयतासंबंधेनसमूहालंबनरूपयघटत्वप्रकारकज्ञानस्यघटादावश्यत्यतेतत्रघटत्वाद्यावा
द्व्यनिवारइतिवाच्यं॥ घटादिवृत्तिविषयतात्वेनैवसंबंधतास्वीकारगमात्॥ एकपुरुषीयज्ञानादन्यपुरुषीयसामान्याश्रयप्रत्यक्षवारणायज्ञानांश

हिरिं६

तत्तत्पुरुषीयत्वं निवेश्यं ॥ इत्थं च पुरुषनेदेनाधिकारणतानेदः । चरमकल्पे कार्यस्य कारणस्य च समवाय एव प्रत्यासत्तिः । अतो नैकपुरुषीयज्ञा
नादन्यपुरुषीयसामान्यज्ञानस्य प्रत्यक्षसंगः । अत एव पूर्वकल्पे क्षयोपशमादेर्न तथात्वं । एतत्कल्पे पुरुषनेदेन कारणतानेदाच्च । नवघटविशेष्यकध्वंस
क्षणतत्प्रत्यासन्नकारणजन्यमितिनियमानुरोधेन ज्ञानप्रत्यासत्तिमतेऽपि विषयीभूतघटत्वादिरूपविषयनिष्ठप्रत्यासत्त्यैवहेतुतावाच्च ॥ इत्थं
चैतत्कल्पोक्ततत्पुरुषीयत्वनिवेशोऽवश्यकएवेतिवाच्यं ॥ एतादृशनियमे मानाभावात् ॥ नावेवाविषयतासम्बन्धेन प्रत्यक्षंप्रतिविषयतासंबन्धे
नेश्वरज्ञानसाधारणज्ञानत्वेनहेतुताकल्पनासामान्यलक्षणायाश्चनन्तपुरुषनेदेनानन्तकारणत्वकल्पनायेक्षयाएकहेतुताकल्पनायाएवन्या
य्यत्वात् ॥ नचात्मनिष्ठप्रत्यासत्तिमतेएकसामान्यज्ञानादयरसामान्याश्रयप्रत्यक्षंवारणायसामान्यानोविशिष्यनिवेशस्यौचित्यात्तेयागौरवं । म
मतुलौकिकान्यमुख्यविशेष्यतासंबन्धेनचाक्षुषत्वावच्छिन्नं प्रतियकारतासंबंधेनचाक्षुषत्वादिमत्वेनैवहेतुत्वकल्पनेनैवोपपत्तौनसामा
न्यनेदेनकारणतानेदः । पुरुषायेक्षयाचविषयाणांवक्तृतरतयापुरुषनेदेनकारणत्वनेदकल्पनायेक्षयासामान्यनेदेनकारणत्वनेदकल्पना
यागौरवमितिवाच्यं ॥ सामान्यस्यविशिष्यानिवेशेद्रव्यत्वप्रकारकचाक्षुषकालेघटत्वादिनिर्विकल्पसत्वेतदुत्तरंद्रव्यत्वज्ञानप्रतिबंधकीभू
तदोषसत्वेघटत्वादिनायावद्घटज्ञानायतेः ॥ यकारतासंबंधेनचाक्षुषादिमतोद्रव्यत्वादेरेवघटेसत्वात् ॥ नचेष्टापत्तिः ॥ सामान्यप्रकारकज्ञा राम
नस्यैवसामान्यलक्षणयाजननात् । द्रव्यत्वप्रकारकज्ञानस्यैवद्रव्यत्वसामान्यलक्षणयाजननात् ॥ प्रत्यक्षायमानसामान्यप्रत्यासत्तिमतेत्व २

प्रकारकचाक्षुषादिसमवायात्मकविशिष्टप्रत्यासत्तेरेवसामान्यहेतुताकल्पनीयेतिनतत्सुरुप्तेदेनकारणतावाहुल्यं॥इतिचेन्न॥एवमपिघटत्वत्वा
दिरूपेणैवहेतुतायावाच्यतयाघटेतरावृत्तित्वविशिष्टयावघटवृत्तित्वरूपघटत्वत्वाभिनिवेशप्रयुक्तगौरवस्यायरिहार्यत्वात्। मन्मतेत्वरूपतए
वघटत्वनिवेशात्।नचघटत्वादीनामाश्रयतासंबंधेनघटत्वत्वादिनैवहेतुत्वंकल्पते॥नघटत्वादिनेतिवाच्यं॥तथासतिद्रव्यत्वादीनामेवतादृश
कारणतावच्छेदकाक्रांतद्रव्यत्वत्नानप्रतिबंधकदोषसत्वेघटत्वप्रकारकयावघटत्वाक्षुषायप्तिः।नचैवमपिघटादिसामान्यलक्षणास्थलेस्वरूप
तोघटत्वादीनामेवकारणतावच्छेदकातयागौरवान्नावात्॥तत्रसामान्यहेतुतार्थावाच्यकाभावइतिवाच्यं॥घटनाशादिशादमपितदाश्रयप्रत्य
क्षोदयात्तत्रापिपरम्परयाघटत्वादीनामेवप्रत्यासत्तितायानवतावाच्यत्वात्॥वस्तुतस्तु॥सामान्यज्ञानप्रत्यासत्तिमतेपिलौकिकान्यसुख्यविशे
ष्यतानिरूपितप्रकारतासंबंधेनचाक्षुषत्वावच्छिन्नंप्रतिप्रकारतासंबंधेनचाक्षुषत्वादिनाहेतुत्वंकल्प्यते॥श्रतोनसामान्यज्ञानदेनहेतुताभेद
नवतन्मतेपितादृशसंबंधेनचाक्षुषादिकंप्रतिप्रकारतासंबंधेनचाक्षुषत्वादिनातादात्म्यसंबंधेनहेतुताकल्प्यतेइतिनसामान्यज्ञानदेनहे
तुताभेदश्रतिलाघवानवकाशइतिवाच्यं॥एवमपिचाक्षुषत्वजातेरवच्छेदकतोपेक्षयाचाक्षुषत्वेनानेनचाक्षुषाणांतथात्वेगौरवात्॥वे
स्तुतस्तु॥परम्परासंबंधेनघटत्वप्रकारकज्ञानविरहदशायामपिसाक्षात्संबंधेनघटत्वादिप्रकारकज्ञानोदयात्तत्रचानायत्याघटादेरपि
प्रकारतायास्तानस्यकारणत्वेःतीतादृशोत्पत्तौतादृशज्ञानेव्यभिचारात्सामान्यज्ञानमेवप्रत्यासत्तिः॥श्रथकार्यतावच्छेदकसंबंधेनकार्य्यावि

करणतदव्यवहितपाक्षणावच्छेदेनकारणतावच्छेदकसंबंधावच्छिन्नकारणप्रतियोगिकाभाववत्त्वमेववक्तव्यं निवारः॥ अत्रचतादृशघटकारत्वरूप
कार्यतावच्छेदकसंबंधेनकार्याधिकरणीभूतातीतघटादौतादृशप्रत्यक्षाव्यवहितपूर्वक्षणावच्छेदेननचाक्षुषवत्त्वावच्छिन्नप्रतियोगिकाभावस्य दर्शनेनतत्रव्य
भिचारः॥ नैवंस्यप्रतियोगितावच्छेदकेनसहविरोधात्॥ नचयत्कालावच्छेदेनयत्प्रतियोगितावच्छेदकंयत्रवर्त्ततेतत्कालावच्छेदेनतद्भेदोन
वर्त्ततेइतिवाच्यं॥ एवंकृतेवातीतघटादौतत्कालावच्छेदेनचाक्षुषनास्तीतितत्कालावच्छेदेनतद्भेदोवर्त्ततइतिवाच्यं॥ इतिवाक्यं तत्कालस्याप्यवच्छेद्य
चाक्षुषवत्त्वाधिकरणीभूतघटानधिकरणतयातदवच्छेदकत्वासंभवइवतदभावावच्छेदकत्वस्याप्यसंभवात्॥ नव्यभिचारइतिचेन्न॥ एवम
प्यतीतघटादौकार्यीव्यवहितपाक्षणावच्छेदेनसामग्र्यासत्वात्तत्रप्रकारतासंबंधेनप्रत्यक्षोत्पादासंभवात्॥ नवंनवन्मतेयेतत्कालस्थाः
तीतघटनिष्ठप्रकारतासंबंधावच्छिन्नज्ञानरूपकारणाधिकरणतानवच्छेदकतयाकथन्तदानीतादृशप्रकारतासंबंधेनकार्यमुत्पत्स्यतइ
तिवाच्यम्॥ विषयतासंबंधावच्छिन्नाधिकरणतायामधिकरणसंबद्धस्याप्यवच्छेदकत्वात्॥ अन्यथाज्ञानेच्छादीनांविषयनिष्ठप्रत्यासत्याक
र्यकारणतावविलोपप्रसंगात्॥ अन्यथावाघटकतस्थलेवच्छेदकत्वमनन्तर्भाव्यंयत्रदेशेयत्क्षणाव्यवहितपूर्वक्षणवृत्तिचाक्षुषरूपंकारणं
प्रकारतासंबंधेनवर्त्ततेतत्रतत्क्षणवृत्तिचाक्षुषादिरूपंकार्यमुत्पद्यतइतीवसामग्रीव्याप्तिरभ्युपेयतइत्यतोनानुपपत्तिः॥ नवंमतेचैतत्का
लवृत्तिसामान्यस्यातीतघटादौतादात्म्यसंबंधेनासत्वात्तादृशव्याप्त्यभ्युपगमेपिननिस्तारः॥ अथविनश्यदवस्थसन्निकर्षजन्यसामान्यप्रकार

कचाक्षुषानन्तरं सामान्यप्रत्यासत्तिजन्याक्षुषापत्तिः॥ स्वाश्रयविशेष्यतानिरूपितसामान्यप्रकारताकत्वसंबंधेनचक्षुःसंयोगविशिष्टचाक्षुष
त्वादिनाऽऽत्मनिष्ठप्रत्यासत्त्याऽऽत्माश्रयविशेष्यतानिरूपितत्व संबंधेनचक्षुःसंयोगविशिष्टप्रकारतात्मकविषयनिष्ठप्रत्यासत्त्याचाक्षुषत्वादि
नावाहेतुत्वेधूलीपटलविशेष्यकधूमत्वप्रकारकभ्रमोविनश्यदवस्थदोषेणतत्रतदुत्तरं यावद्भ्रमप्रत्यक्षापत्तिः॥ स्वात्मनिष्ठप्रत्यासत्तिक
त्वेनतत्तत्सामान्याश्रयीभूतस्वाश्रयविशेष्यतानिरूपिततत्सामान्यप्रकारताकत्वसम्बन्धेनचक्षुःसंयोगविशिष्टप्रकारतासंबंधेनचाक्षुषत्वादि
नोहेतुत्वकल्पनेतुधूलीपटलादिविशेष्यकधूमत्वादिभ्रमजनकदोषसत्वेपियावद्भ्रमाश्रयप्रत्यक्षानुदयप्रसङ्गः॥ तत्रचदोषादिवैशिष्ट्य
निवेश्यकार्यकारणभावौ तरकल्पनेपि व्यभिचारवारणमशक्यमेवेतिचेन्न॥ सामान्यप्रत्यासत्त्या सामान्यप्रकारकरतानिरूपितलौकिकविष
यताशून्यचाक्षुषादीनांकुत्रापिजननात्॥ तादृशविशेष्यतावालिचाक्षुषादिसामग्रीसहकारीणांवसामान्यप्रत्यासत्तेःफलजनकत्वान्युक्तमे
नायत्यसम्भवात्॥ विशेषनीर्यंचेदमधिकमग्रे॥ नचयत्रैकघटेविनश्यदवस्थसन्निकर्षात्तु॥ घटत्वाक्षुषमयत्रचक्षुःसंयोगोत्पादस्तत्रया
वद्घटप्रत्यक्षापत्तिः॥ घटत्वप्रकारतानिरूपितलौकिकविषयतावालिचाक्षुषसामग्रीसत्वादितिवाच्यं॥ उक्तत्वात्॥ मानसस्थलेसामान्यप्रका
रकज्ञानत्वेनैवहेतुता॥ स्मरणादितोपिमानसोदयात्॥ कार्यतावच्छेदकैवंतादृशज्ञानाव्यवहितोत्तरमानसत्वे॥ अव्यवहितोत्तरत्वनिवेशात्घ
टत्वादिविशेष्यकज्ञानात्संबंधान्तरेणतत्प्रकारकज्ञानाद्वायत्रघटइत्याकारकोयंनीतमानतत्रनेव्यभिचारः॥ मानसेउयंनीतस्यापिमुख्यविशेष्य

नयान्नानान्मख्यविशेष्यतांनिवेश्यव्यभिचारवारणमशक्यमितिचेद्यं मानसस्थलेवसामान्यप्रकारकलौकिकसामग्रीनायेक्षते॥घटत्वादिप्रकारकलौ
किकप्रत्यक्षसामग्रीकालेमानसस्यैवानुदयादिति॥नव्यास्तु॥स्मरणादिसाधारणसामान्यविषयकज्ञानत्वेनैवहेतुता॥सामान्यप्रकारकप्रत्यक्ष
त्वेनकार्यता।स्मरणादिकालेपिसामान्यप्रकारकलौकिकप्रत्यक्षमिष्टमेव॥सामान्यप्रत्यासत्तिजन्यचाक्षुषादौसामान्यप्रकारकलौकिकचा
क्षुषसामग्र्यास्तावश्यकत्वात्॥द्वितीयक्षणेसामान्यप्रकारकचाक्षुषोत्पत्त्यातृतीयक्षणेयावत्सामान्याश्रयप्रत्यक्षस्यभवतीत्यावश्यकत्वात्॥
द्वितीयक्षणेनदुत्पादास्वयंगमेक्षतिविरहात्।अन्यथाइन्द्रियनेदंनकारणतावाकुल्यप्रसंगात्॥एवंनिर्विकल्पकोत्तरमपियावत्सामान्याश्र
यप्रत्यक्षमिष्टमेवद्वितीयक्षणेविशिष्टबुद्ध्युत्पत्त्यातृतीयक्षणेप्रत्यक्षोत्पादस्यभवतीत्यावश्यकत्वात्॥नवसामान्यप्रकारत्वापेक्षयासा
मान्यविषयकत्वस्यालघुतयानिर्विकल्पकद्वितीयक्षणेइत्थंयुक्तिरनुचिता॥किंचविषयतात्वेनप्रकारताविशेष्यत्वादीनामवच्छेदकत्वा
पेक्षयाप्रकारतात्वेनप्रकारतामात्रस्यैवतथात्वमुचितमितिवाच्यं॥सामान्यप्रकारकज्ञानस्यहेतुत्वेनिर्विकल्पकोत्तरकालीनसामान्यप्रका
रकलौकिकप्रत्यक्षेसामान्यविशेष्यकज्ञानजन्योयनीतन्नानेव्यभिचारवारणायलौकिकान्यमुख्यविशेष्यतानिवेशस्यावश्यकतयागौरवा
त्॥तन्निवेशेपिसामान्यविशेष्यकज्ञानजन्यसामान्यप्रकारतानिरूपितलौकिकान्यमुख्यविशेष्यताशालिमानसोयनीतन्नानेव्यभिचारवारणा
प्रसंगाच्च॥तद्वारणायावद्व्यक्तीतरत्वनिवेशेचमहागौरवात्॥नचैकसंबन्धेनसामान्यप्रकारकज्ञानात्समवायान्तरेणसामान्याश्रयप्रत्यक्ष

वारणायतत्संबंधेनसामान्याश्रयप्रत्यक्षेतत्संबंधेनसामान्यप्रकारताज्ञानिज्ञानत्वेनहेतुताकल्पनस्यावश्यकतयाकथंनिर्विकल्पसाधारण्यमि
तिवाच्यं॥एकसम्बन्धेनसामान्यप्रकारकज्ञानादपिसंबंधान्तरेणसामान्याश्रयप्रत्यक्षस्योदयात्॥यदियुक्तादृशकल्पनानुभवविरुद्धमितिम
न्यतेतदानायत्यासंबंधविशेष्यंनिवेश्यनिर्विकल्पव्यावृत्तिर्लभ्ये— जनकतावाच्या।सम्बन्धान्तरेणसामान्यप्रकारकज्ञानजन्येसम्बन्धान्त
रेणसामान्यप्रकारकसामान्याश्रयमुख्यविशेष्यकमानसंयनीतज्ञानेव्यभिचारवारणातत्तज्ज्ञानसेननेदंकूटस्थकारणेव्यवहितोत्तरत्वस्य
वाक्यार्थतावच्छेदककोटौनिवेशनमावश्यकमितिध्येयं॥अत्रवदंति॥निर्विकल्पकसाधारणसाक्षात्कारस्यप्रत्यासत्तित्वमतेज्ञानप्रत्या
सत्तेर्हेतुत्वेमानाभावः॥घटोनास्तिसुरनिरूपणमित्यादौघटसोरभादीनांघटत्वसोरनत्वसामान्यलक्षणाप्रत्यासत्तिबलादेवोपपत्तेः॥न
चसामान्यप्रत्यासत्याफलजनने किञ्चिदंशेसामान्यप्रकारकज्ञानसामग्यंतरस्यापेक्षितत्वात्॥उपदर्शितस्थलेचघटांशेघटत्वप्रकारक
ज्ञानसामग्यन्तरविरहेणकथंघटत्वादिसामान्यलक्षणयाघटादिज्ञानजननीयमितिवाच्यं॥तत्रघटादिज्ञानेघटितोयनीतज्ञानसामग्या
एवसत्वात्॥नचज्ञानप्रत्यासत्तेर्हेतुत्वेकथंघटादिज्ञानस्यसामग्रीघटकत्वमितिवाच्यं।घटादिज्ञानस्यघटादिप्रकारकघटत्वसामान्यज्ञा
नविविक्षयैवहेतुत्वसंभवात्।ज्ञानलक्षणायाःपृथक्कारणतायामेवविवादात्॥नचसामान्यलक्षणाविषयाःकूपकारणताकघटादिज्ञा
नघटितायाःसामग्याःसामग्यन्तरत्वेनावश्यंतिवाच्यं॥सामग्यन्तरपदेनयुक्तसामान्यप्रत्यासत्यतिरिक्तसामग्याएवविवक्षितत्वात्।घटादि-

ज्ञानस्यापि घटत्वादिसामान्यलक्षणाया अतिरिक्ततया सामग्यंतरत्वोपपत्तेः। नवतत्र घटत्वसौरभत्व भानानुरोधेन ज्ञानलक्षणाया: पृथक्कारणत्वमावश्यकं॥ तद्वृत्तिधर्मज्ञानाभावेन सामान्यप्रत्यासत्यातज्ज्ञानानिर्वाहादितिवाच्यं॥ घटत्वसौरभत्व सामान्यलक्षणाप्रत्यासत्तेर्ज्ञेयतावच्छेदककोटौ घटत्वसौरभत्वादिविषयतानिवेशेन तादृशवशादेवतज्ज्ञानस्याप्युपपत्तेः। यत्तु रजतत्वादिनाशुक्त्याद्युपनीतभानानुरोधेन ज्ञानलक्षणाप्रत्यासत्तेः पृथक्कारणत्वकल्पनमावश्यकं॥ तत्र शुक्तिधर्मज्ञानाभावेन सामान्यलक्षणतस्तदनिर्वाहादिति॥ तदपि॥ रजतत्वसामान्यलक्षणावैशिष्ट्यादेवतत्र शुक्तिभानोपपत्तेः॥ नच रजतत्वसामान्यलक्षणाया: रजतत्वाश्रयत्वलक्षणत्वेवहेतुताया कथंतद्वत्त्वज्ञानमिति वाच्यं॥ शुक्तेरपि कालिकसंबंधेन रजतत्वाश्रयत्वात्॥ वस्तुतोदोषादिकृत्यकारणतावलादेवतत्र शुक्तिभानमिति नतदनुरोधेनज्ञानप्रत्यासत्तिहेतुताया श्रावश्यकत्वं॥ नचरजतत्वज्ञानकाले शुक्तेरज्ञानेपिदोषादिबलात्तादृशोपनीतभानापत्तिरितिवाच्यं॥ दोषस्यफलबलकल्पतयातत्रफलानुभवेनदोषस्यैवाकल्पनात्॥ अथज्ञानलक्षणाया: पृथगहेतुत्वे केनचिद्रूपेणा घटत्वविशेष्यकज्ञानदशायांघटज्ञानाद्यसंभवे घटादिमुख्यविशेष्यकमानसोपनीतभानापत्तिः। नचतदानीं सामान्यलक्षणयैवघटादिमानसज्ञननाद्घटादिमानसमिष्टमेवेतिवाच्यं घटत्वादिसामान्यलक्षणाया किंचिदंशेघटत्वप्रकारकज्ञानसामग्यंतरसहकारेणैवफलजननात्तत्रघटादिमानसमिष्टत्वात्। इतिचेदेवमपि लौकिकान्यतद्विषयताशालिज्ञानत्वावच्छिन्नंप्रतितद्विषयकज्ञानत्वेनैकहेतुताकल्पनेनैवोपपत्तौज्ञान: प्रत्यासत्तिसामान्यप्रत्यासत्योः

पृथक्कारणतायांमानाभावः॥ नवाज्ञानसामान्याश्रयत्वज्ञेसामान्यत्वासतिजन्येव्यभिचारादेतादृशकारणताकल्पनंनसंभवतीतिवाच्यंकार
णव्यवहितोत्तरत्वंकार्यतावच्छेदककोटौनिवेश्यव्यभिचारवारणायत्वात्॥ नचघटाद्यंशेलौकिकयावद्घटज्ञानस्यलौकिकान्यघटत्वविषय
तासूच्यत्वेनेतादृशकार्यतावच्छेदकानाक्रान्तत्वेनतत्रघटत्वादिज्ञानस्यपृथक्कारणताकल्पनस्यावश्यकत्वमितिकथमेककारणतयानिर्वाह
इतिवाच्यं॥ घटत्वाद्यंशेलौकिकान्यविषयतासूच्यत्वेनेतादृशकार्यतावच्छेदकानाक्रान्तत्वेनतत्रघटत्वादिज्ञानस्यपृथक्कारणताकल्पनस्याऽऽ
वश्यकत्वमितिकथमेककारणतयानिर्वाहइतिवाच्यं॥ घटत्वाद्यंशेलौकिकान्यविषयतायास्वीकारेणतादृशज्ञानस्यतादृशकार्य
तावच्छेदकाक्रान्तत्वात्॥ वस्तुतोऽव्यवहितोत्तरत्वनिवेशेनवलौकिकज्ञानेव्यभिचारस्यासंभवान्नलौकिकान्यत्वनिवेशइतिनतत्साधारणायानु
पपत्तिः॥ नचयदितद्विषयकत्वेतद्विषयकज्ञानत्वेनहेतुतामात्रंकल्पते॥ तदासामान्यलक्षणाजन्यज्ञातेव्यक्तीनांविषयत्वमनुपपन्नं
सामान्यज्ञानजन्यतावच्छेदककोटौतद्विषयत्वानिवेशादतःसामान्याश्रयविषयतांकार्यतावच्छेदककोटौनिवेश्यसामान्यज्ञानस्यहेतुत्वौचित्य
मकल्पनीयमितिवाच्यं॥ सामान्यज्ञानजन्यतावच्छेदककोटौसामान्याश्रयविषयतायाःस्वनिवेशेयितत्तद्विषयकयत्वेच्छाविरहविशिष्ट
विशेषविषयतावाजन्यतावच्छेदककोटौतत्सामान्याश्रयविषयकत्वोपयत्तेः॥ नचैवंसामान्यज्ञानजन्यतावच्छेदकाक्रान्ततयासामान्यज्ञा
ज्ञानत्वेनातदायत्तसंभवात्॥ इतिदिक्॥ विस्तरेणतद्विषयकयत्वेच्छास्यतत्तद्विषयज्ञत्वासत्वहेतुजन्यनियमानुरोधेनविषयतासंबंधे

नेश्वरज्ञानसाधारणज्ञानत्वेनहेतुतायाश्चवृथाकल्पनीयत्वात्सैवसामान्यप्रत्यासत्तिहेतुता।लौकिकान्यविषयताशालिप्रत्यक्षंप्रतियद्विष
यकज्ञानत्वेनहेतुत्वंतदेवत्वज्ञानलक्षणाहेतुत्वमित्यलौकिकप्रत्यासत्तेस्त्रैविध्यमव्याहतमितितुकेचित्॥यदिवतत्तत्प्रत्यक्षविषयता
याःकारणतावच्छेदकसंबंधेनसन्निकर्षाश्रयत्वंनियतंवक्तव्यंतामाणिक्यंतदानप्रत्यासत्तिसामान्यप्रत्यासत्त्योःकार्यकारणभावकल्पनमाव
श्यकं॥तथाहिजलतेजःसामान्यलक्षणायाःत्वविषयीभूततत्तत्सामान्याश्रयीवत्वप्रत्याज्ञानत्वेनतत्सामाश्रयवृत्तिविषयतयाप्रत्यक्षता
वच्छिन्नंप्रतिहेतुताकल्पनीयेति॥एवंचघटोनास्तिसुरभिचंदनमित्यादौघटत्वसौरभत्ववृत्तिधर्मज्ञानाभावेनोपदर्शितकारणतावच्छेद
कप्रत्यासत्त्योतत्तत्सामान्यलक्षणायाश्रयावात्।तज्ज्ञानोपयतयेलौकिकान्यविषयताप्रत्यासत्याप्रत्यक्षत्वावच्छिन्नप्रतिविषयतयाज्ञान
त्वेनज्ञानलक्षणाप्रत्यासत्तेर्हेतुत्वान्तरकल्पनमावश्यकं॥अथनिर्विकल्पकसाधारणप्रत्यासत्तिमतेतदुपदर्शितस्थलेघटत्वादिज्ञानं
सामान्यलक्षणयाहेतुत्वेपितत्पुरुषीयत्वंनविवेक्ष्यतेतत्पुरुषस्यघटत्वज्ञानशून्यकालेसमवायप्रत्याकूपहेतुताकस्यविशेषणज्ञानस्य
विरहेणान्यदीयघटत्वज्ञानतेनरूपेणघटादिप्रत्यक्षवारणसंभवात्।एवंचघटोनास्तीत्यादिप्रत्यक्षसूपपद्यतएवेश्वरस्यैवघटत्वसौ
रभत्वादिवृत्तिधर्मस्यनियमतःसत्वात्तद्घटत्वसौरभत्वादीनांज्ञानंउत्पत्स्यतेकिन्तदनुरोधेनज्ञानप्रत्यासत्तिहेतुत्वकल्पनाय॥नचायद रामः
र्शितस्थलेघटत्वादिज्ञानंनसामान्यलक्षणाप्रत्यासत्तिउत्पद्यतेसामान्यधर्मप्रकारकत्वस्यसामान्यलक्षणाजन्यतावच्छेदककोटिनिवि ६८

दृतयातादृशबोधस्यचघटत्वादिवृत्तिसामान्यधर्मप्रकारकत्वेनतादृशसामान्यज्ञानजन्यतावच्छेदकानाक्रान्तत्वादितिवाच्यं॥सामान्यज्ञान
हेतुतायांतत्तुरुधीयत्वानिवेशोव्यभिचारविरहेपिसामान्यप्रकारकत्वस्यजन्यतावच्छेदकावच्छिन्ननिवेशेप्रयोजनाभावात्॥मैवं सामान्य
लक्षणायाःफलजनेतत्तत्सामान्यप्रकारकप्रत्यक्षसामग्यान्तरस्यसहकारित्वास्वयगभात्॥उपदर्शितस्थलेघटत्वादिसामान्यप्रकारकप्र
त्यक्षसामग्रीविरहेणघटत्वज्ञानेनसामान्यलक्षणयोपपद्यतेऽतोज्ञानलक्षणायाःपृथक्कारणत्वमावश्यकमेव॥एवंघटाद्युपस्थितिकदशा
यामिवतच्छून्यकालेपिघटत्वादिविशेष्यकज्ञानात्॥घटत्वादिनाघटमुख्यविशेष्यकमानसंलक्षणायाःपृथक्कारणत्वाकल्पनेनस्यात्॥इति
तदावश्यकमितिचेत्॥यत्तूपदर्शितकनियमानुरोधेनविषयतयाप्रत्यक्षत्वावच्छिन्नप्रतियोगिताविषयधर्मवत्त्वसम्बन्धेनविषयतासंबंधे
नविषयतासंबंधेनवाईश्वरज्ञानसाधारणेनज्ञानत्वेनैकमेवहेतुसामान्यलक्षणाःस्वेनतत्तत्सामान्यभेदेनभिन्नमिति॥घटत्वज्ञानदशायां
तदनाश्रयधर्मिकज्ञानायोगित्वेनविवारसहावृत्तिधर्मप्रकारेणतादृशधर्मिज्ञानस्यतादृशधर्मात्मकविशेषणज्ञानविरहेणघटत्वादि
नाज्ञानस्यचदोषविरहेणयादयितुमशक्यत्वात्॥सतिचदोषेघटत्वादिनातज्ञानस्येष्टत्वादिति॥तदसत्॥तथाहि उपदर्शितैककार्य
कारणभावकल्पनेघटत्वाद्यात्मकविशेषणज्ञानसहकृतयेवज्ञानसामान्यस्यफलाव्यवहितत्वंस्वीकरणीयं॥एवैकविशेषणसहकारेणै
वतस्यघटादौप्रत्यक्षजननात्॥एवंचयत्किञ्चित्सामान्यज्ञानदशायांप्रमेयमात्रेविषयतासम्बन्धेनप्रत्यक्षसामान्यापत्तिर्दुर्वारेवो

रेवाविशिष्टहेतुत्वेचतत्सामान्यज्ञानात्॥ नतदनाश्रयज्ञानापत्तिः॥ स्वविषयतत्सामान्याश्रयव ध्यासत्यातस्यतदनाश्रयेसत्वात्॥ नचसामान्य
नेदेनहेतुतानेदेपिईश्वरीयप्रमेयत्वादिसामान्यज्ञानात्तज्ज्ञानस्यव्यतिरेकिणश्चित्सामान्यज्ञानवतः सुमो विश्वविषयकश्यस्याय
त्तिरितिवाच्यं॥ प्रमेयत्वादिसामान्यलक्षणायाकार्यजननेप्रमेयत्वादिरूपविशेषणज्ञानस्यैवसहकारित्वात्॥ तादृशविशेषणज्ञानविशेष
णीयदर्शितायत्तेरसंभवात्॥ घटत्वादिनायत्किंचिद्धर्म्मिनासकलौकिकसन्निकर्षशून्यकालेघटत्वादिसामान्यलक्षणाजन्यप्रत्यक्षानुदया
त्॥ तत्सामान्यधर्म्मप्रकारेणयत्किंचिद्धर्म्मिविषयकप्रत्यक्षजनकसामग्यंतरस्यसामान्यलक्षणासहकारित्वंस्वीकरणीयं॥ सामग्यन्तरं च
लौकिकप्रत्यक्षसामग्रीउन्नीतनानसामग्रीवतयोश्चप्रत्येकंसहकारितावोध्या। सामान्यासत्तिज्ञान्यज्ञानेतादृशसामग्यन्तरस्यपृथक्कारणत्व
मितितुभ्रमोन्नकार्य्यः॥ लौकिकसन्निकर्षजन्यतावच्छेदकधर्म्मस्यसामान्यप्रत्यासत्तिजन्यज्ञानसाधारणतयातत्रलक्षणहेतुतयेवोपयु
क्तेः॥ नहिस्वतंत्रहेतुत्वाकल्पनेकुत्रचिदापत्तिः संभवति॥ तथाहि॥ तद्धर्म्मावच्छिन्नयत्किंचिद्यत्किंनिष्ठकार्य्यतानिरूपितकारणतावच्छे
दकीभूतायावन्तोधर्म्माःप्रत्येकंतदवच्छिन्नसौमात्मिकासामग्रीवत्तद्धर्म्मावच्छिन्नायादिका। घटत्वाश्रयस्यकस्यचिल्लौकिकसामग्रीघनीतस्या
नसामग्रीरसंभवेतादृशसामग्रीवनास्ति॥ य घटत्वादिप्रकारकप्रत्यक्षत्वावच्छिन्नंप्रतिद्विविधमेवघटत्वादिप्रकारतानिरूपितलौकिकवि
षयतासालिघटत्वादिनोपनीतयत्किंचिद्धर्म्मविषयकंतत्रकिंचित्प्रमेनप्रमेयमस्योपादानेतन्निष्ठकार्य्यतानिरूपितकारणतावच्छेदकाव

छिन्नलौकिकसन्निकर्षादेः प्रत्यक्षस्यकोयादानेतन्निष्ठकार्यतानिरूपितकारणतावच्छेदकावच्छिन्नोपनायकज्ञायटत्ववत्वरूपविषयनिष्ठप्रत्या
सत्यासामान्यलक्षणायाहेतुत्वकल्पेवा वह्नुद्यघटेषुतादृशप्रत्यासत्याघटत्वज्ञानसत्वाद्विषयतयाप्रत्यक्षोत्पत्तौवाधकाभावेननार्घतायाव
द्घटविषयकाप्रत्यक्षायतेईश्वरत्वात्॥ यत्तु॥ घटत्वप्रकारकतानिरूपितलौकिकविषयताघटत्वज्ञानजन्यतावच्छेदककोटौनिवेश्यते॥ ए
वञ्चतद्धर्मावच्छिन्नयत्किञ्चिद्यत्किञ्चिन्निष्ठकार्यतानिरूपितकारणतावच्छेदकायावन्तोधर्माः प्रत्येकंकृतदवच्छिन्नस्तोमात्मिकायास्तद्धर्मावच्छिन्नोपनायकसामग्र्याः लौकिकसन्निकर्षघटितायाउपदर्शितस्थलेऽभावात्नापत्तिः घटोनास्तीत्यादौघटादिज्ञानस्यज्ञानलक्षणाप्रत्यक्षादितिं॥ मैवं घटत्वादिप्रकारतानिरूपितकारणतानिरूपितलौकिकविषयतायाजन्यतावच्छेदककोटौनिवेश्यसामान्यलक्षणाजन्यघटादिमानसप्रत्यक्षमेव॥ घटत्वादिप्रकारतानिरूपितलौकिकविषयतायाशालिचक्षुरिन्द्रियजन्यप्रत्यक्षंप्रत्यकारकमानसञ्च॥ तथाचसामग्रीव्यापृतौयत्किंचित्प्रत्यक्षमुत्पद्यतेयादानेतन्निष्ठकार्यतानिरूपितकारणतावच्छेदकावच्छिन्नस्तोमात्मिकायाः सामग्र्याः लौकिकसन्निकर्षादिघटिततयातदभावादेव घटोनास्तीत्यादिचाक्षुषादिलक्षणोतदायत्यसंभवः॥ स्वप्रत्यक्षोयादानेचतन्निष्ठकार्यतानिरूपितकारणतावच्छेदकावच्छिन्नस्तोमात्मिकायाः सामग्र्याः चक्षुरादिसामग्र्याभावघटिततयातदभावादेव घटोनास्तीत्यादिस्थलेस्वयादकविरहादयंतिविरहः॥ स्व

यसामान्यप्रत्यासत्तिघटितव्याप्तौ घटत्वादिधर्म्मघटकलौकिकप्रत्यक्षसामग्यादेस्तादृशसामग्रीत्वेनघटचक्षुःसंयोगत्वादिनावानिवेशः संभवति॥तादृशधर्म्माणांकारणतावच्छेदकत्वात्॥कारणतानवच्छेदकावच्छिन्नस्यसामग्रीनिवेशेनातिप्रसङ्गवारणीमव्यसर्च्चमतसिद्धचक्षुस्तत्कार्य्यकारणभाव विलयप्रसंगात्॥तथाचालौकिकसंयोगावच्छिन्नचक्षुःसंयोगत्वादिनालौकिकप्रत्यक्षादिहेतवःसामग्रीव्याप्तौनिवेशनीयाः॥तथाचतादृशचक्षुःसंयोगादिकंसमवहितघटत्वादिज्ञानंयदायत्रकारणतावच्छेदकप्रत्यासत्त्यातदव्यवहितोत्तरक्षणेतत्रकार्य्यमित्येवंरूपसामग्रीव्याप्तिरुपगंतव्या॥चक्षुःसंयोगादिसमवहितत्वंचैकक्षणावृत्तित्वंसंबंधेनतद्विशिष्टत्वरूपंग्राह्यं॥नत्वेकदेशावृत्तित्वसंबंधेनतद्विशिष्टत्वरूपंकारणतावच्छेदकप्रत्यासत्तेस्तेषामेकवृत्तित्वासंभवात्॥त्वद्विषयीभूतसामान्यांशयत्वप्रत्यासत्त्यासामान्यज्ञानहेतुतामतेतादृशसंबंधेनघटत्वज्ञानादीनांघटचक्षुःसंयोगसमानदेशतासंभवेपिघटचक्षुःसंयोगसमवहितेनापिघटत्वादिज्ञानेनघटादौघटत्वाद्यनुभजनकदोषादिसमवधानदशायांयावद्घटादिवाक्षुषजननमेकदेशेवृत्तित्वासंभवात्।एवंचदोषादिशून्यकालेपिघटादिचक्षुःसंयोगमात्रसत्वेघटत्वादिज्ञानकार्य्यतावच्छेदकावच्छिन्नाप्रतीतिः॥चक्षुःसंयोगादिकालवृत्तित्वविशिष्टसामान्यज्ञानसत्वात्।विनैवदोषंघटचक्षुःसंयोगदशायांतदुत्पत्त्यापत्तेर्दोषनिवेशासंभवादितिचेत्तर्हिबाधानावादिघटितसामग्रीव्याप्तौकागतिः।तत्रापिबाधानावादिप्रकारकचाक्षुषानर्णयानावादिघटितसामग्रीव्याप्तौसन्निकर्षादीनांघटचक्षुःसंयोगत्वादिनानिवेशासंभवात्।चक्षुःसंयोग

त्वादिनैवतेषांनिवेशनीयतयाघटादिचक्षुःसंयोगकालेविनैवघटचक्षुःसंयोगादिकंतज्ज्ञन्यतावच्छेदकीभूतघटादिप्रकारकचाक्षुषत्वं
वच्छिन्नायते॥स्वघटतत्तद्घटादिवृत्तिविषयतासंबंधेनज्ञानत्वावच्छिन्नंप्रतितादृशसम्बंधेनेश्वरज्ञानसाधारणज्ञानत्वेनहेतुताकल्पते॥त
द्घाचघटवृत्तिविषयत्वसमवायादिरूपकारणतावच्छेदकप्रत्यासत्तिघटितसामान्याधिकरण्यसंबंधेनतादृशज्ञानविशिष्टचक्षुःसंयो
गात्मकविषयवृत्तिसामग्यासमवहितघटानावचाक्षुषाद्यनावस्यैवघटादिचाक्षुषादिरूपकार्यतावच्छेदकावच्छिन्नव्याप्यत्वमभ्युपे
यते।घटचक्षुःसंयोगादीनांचघटवृत्तिविषयतासंबन्धेनज्ञानाधिकरणेवर्तमानेनतत्समवहितवाद्यनावादिबलात्घटचाक्षुषाप्य
त्तिरितिचेत्॥तुल्यप्रकृतेपि।नवघटचक्षुःसंयोगदशायामपिघटेघटत्वभ्रमजनकदोषादिमत्त्वेघटत्वसामान्यलक्षणाजन्यचाक्षु
षोदयात्॥घटादिवृत्तिवृत्तिविषयतासमवायघटितसामानाधिकरण्यसंबंधेनज्ञानविशिष्टचक्षुःसंयोगाद्यात्मकसामग्रीसमवहि
तघटत्वज्ञानस्यापिफलव्याप्यत्वंस्वीक्रियते।तद्यादोषादिशून्यकालोपियटानात्रचक्षुःसंयोगसत्वे सामान्यलक्षणाजन्यज्ञानायति
ईश्वरैवेत्याशंकनीयं॥तादृशस्थलेदोषस्यापिनिवेशात्॥नचैवघटत्वाद्येकैकसामान्यलक्षणाप्रत्यासत्तिघटितसामग्रीव्याप्येरेवघ
टयटादिनेदेनानन्त्याद्गौरवमितिवाच्यं॥गत्यन्तरानावेनतादृशगौरवस्याकिञ्चित्करत्वात्॥परंतु।घटत्वादिप्रकारकतानिरूपितमु
ख्यविशेष्यताशालिमानसयत्वक्षस्यातिस्ववृत्तिघटितियोगिकत्वसम्बन्धेनवृत्तिविशिष्टघटत्वप्रकारकतानिरूपितालौकिकविषयताशा

लिप्रत्यक्षप्रतियोगिभावत्वेनात्मनिष्ठप्रत्यासत्त्याहेतुत्वं कल्प्यते ॥ तादृशसंबंधेन कृतिविशिष्टः सत्प्रतियोगिभावः प्रतियोग्यव्यवहितपूर्वक्षणे एववर्त्ततएवनातिप्रसंगः ॥ इत्थंचैकात्मवृत्तित्वसंबंधेन तादृशप्रतियोगित्वविशिष्टघटत्वज्ञानत्वाद्यवच्छेदेनफलतानिरूपितैकत्वाश्रयत्वंप्रत्येयते ॥ घटोनास्तीत्याद्यप्रत्यक्षेव्यभिचारवारणायमुख्यविशेष्यताश्रयःघटइत्याकारमानसेतद्वारणायमानसान्यत्वनिवेशनमावश्यकमितिप्राहुः ॥ ॥ इतिसामान्यलक्षणाविवेकः ॥ ॥ यद्वाचनेयमिहतोपि शंकितोवुद्धिसंयुतः ॥ लेखकस्यतदज्ञस्य लिखितंक्षम्यतांवुधैः ॥ ॥ शुभं ॥

रामः